श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीहयग्रीवमङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीहयग्रीवमङ्गळम् ॥

अशेषवेदरूपाय यथार्थज्ञानदायिने।
विद्यालक्ष्मीसमेताय वाजिवक्त्राय मङ्गलम् ॥ **1** ॥

पालने ज्ञानदाने च प्रवणात् अनिरुद्धतः।
आविर्भूताय वेधोर्थमश्वग्रीवाय मङ्गलम् ॥ **2** ॥

स्वनाभिपद्मजायाऽऽदौ स्वोपदिष्टाः श्रुतीः समाः।
स्थिरं पुनरदात् योऽस्मै तुरङ्गास्याय मङ्गलम् ॥ **3** ॥

मध्वाभान्मधुमब्बिन्दोः कैटभं कठिनादपि।
कृत्वाऽरी शिक्षिताजाय गन्धर्वास्याय मङ्गलम् ॥ **4** ॥

पादव्यवस्था यत्रार्थवशेनैवमृगात्मने।
यजुषे यज्ञरूपाय हयग्रीवाय मङ्गलम् ॥ **5** ॥

यदुद्गीथस्वरत्रस्तौ दैत्यौ वेदापहारिणौ।
प्रणवोद्गीथरूपाय पुण्यहेषाय मङ्गलम् ॥ **6** ॥

वामपुस्तकहस्तस्वभुजाऽऽश्लिष्टरमात्मने।
व्याख्यामुद्रान्यहस्ताय वाजिवक्त्राय मङ्गलम् ॥ **7** ॥

शरद्घनस्थचन्द्राभ पुण्डरीकस्थमूर्तये।
शङ्खचक्रधरायास्तु सैन्धवास्याय मङ्गलम् ॥ **8** ॥

ज्ञानामृतघटीयन्त्र साक्षचिन्मुद्रपाणये।
मुमुक्षाहेतुवीक्षाय मधुहन्त्रेऽस्तु मङ्गलम् ॥ **9** ॥

यस्याक्षरसमाम्नायो ह्यकारादिर्हलन्त्यवाक्।
मध्ये हयवरश्लिष्टो हयास्यस्यास्य मङ्गलम्॥ 10॥

अश्विदध्यङ्याज्ञवल्क्य कश्यपादिश्रिताङ्घ्रये।
वैष्णवक्रतुनेष्टाय वाजिवक्त्राय मङ्गलम्॥ 11॥

रजोमूर्तेर्वधूं वाणीं कुर्वते सत्त्वहेतवे।
तमोमूर्तिञ्च सर्वज्ञं तुरगास्याय मङ्गलम्॥ 12॥

रामदेशितमार्गेण पाञ्चालेनार्चिताङ्घ्रये।
व्यासादिजप्यमन्त्राय वाजिकण्ठाय मङ्गलम्॥ 13॥

सर्वसूक्ष्मार्थविज्ञानं साधुव्याहारधोरणी।
यन्मन्त्रजपतस्तस्मै हयग्रीवाय मङ्गलम्॥ 14॥

दशावतारा यस्य स्युः पाश्चात्याः वेधसां गुरोः।
हव्यकव्यभुजे तस्मै हयग्रीवाय मङ्गलम्॥ 15॥

श्रवणोदग्रकर्णाय श्रवणर्क्षोद्भवाय च।
श्रवणग्राह्यवाग्दात्रे श्रीहयास्याय मङ्गलम्॥ 16॥

यत्कटाक्षकलालेशकलनात् सकलाः कलाः।
स्वयमाविर्भवन्त्यस्मै शीर्षण्यश्वाय मङ्गलम्॥ 17॥

धर्माविरुद्धयोरर्थकामयोरमृतस्य च।
हेतुं वाचं ददानाय हयग्रीवाय मङ्गलम्॥ 18॥

सर्वविद्याप्रतिष्ठानब्रह्मविद्याप्रदायिने।
वागीश्वरेश्वरायास्तु वाजिवक्त्राय मङ्गलम्॥ 19॥

ज्ञानाय ज्ञानरूपाय ज्ञानिने ज्ञानदायिने।
सर्वोत्तमाय श्रीशाय हयग्रीवाय मङ्गलम्॥ 20॥

य इदं श्रीहयग्रीव मङ्गलं नियतं पठेत्।
विद्यावाग्धनवंशायुर्वृद्धिसौख्यानि सोऽश्नुते॥ **21** ॥

॥ इति श्रीलक्ष्मीहयग्रीवमङ्गळं समाप्तम्॥